# कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः इति सूत्रस्य प्रदीपन्यासदृष्ट्या विमर्शः

अनुपदीपः*
प्रो.भारतभूषणत्रिपाठी**

**सारांशः -**

महर्षिपाणिन्युपज्ञायामष्टाध्याय्यां पञ्चमाध्यायस्य चतुर्थपादे पञ्चाशत्तममिदं सूत्रम्। अत्र सूत्रे कृभ्वस्तियोगे इति सप्तम्यैकवचनम्, सम्पद्यकर्तरि इत्यपि सप्तम्यैकवचनम्, च्विरिति प्रथमान्तं पदम्। अनेकपदमिदं सूत्रम्। प्रत्ययः, परश्च, आद्युदात्तश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः, वा इति चाधिक्रियन्ते। का च भूश्च अश्च तरह षां समाहारद्वन्द्वः कृभ्वस्ति, तस्य योगः, तस्मिन् कृभ्वस्तियोगे इत्येतस्य सूत्रस्य व्याख्यानमत्र शास्त्रदृशा प्रदर्श्यते।

**कुंजीशब्दाः -**

महर्षिपाणिनिः, अष्टाध्यायी, सूत्रम्, कृभ्वस्तियोगे, कर्तरि, सप्तम्यैकवचनम्, च्विः, पदम्, प्रत्ययः, तद्धिताः, समाहारद्वन्द्वः।

---

**सूत्रपरिचयः**

महर्षिपाणिन्युपज्ञायामष्टाध्याय्यां पञ्चमाध्यायस्य चतुर्थपादे पञ्चाशत्तममिदं सूत्रम्। अत्र सूत्रे कृभ्वस्तियोगे इति सप्तम्यैकवचनम्, सम्पद्यकर्तरि इत्यपि सप्तम्यैकवचनम्, च्विरिति प्रथमान्तं पदम्। अनेकपदमिदं सूत्रम्। प्रत्ययः, परश्च, आद्युदात्तश्च, ङ्याप्प्रातिपदिकात् , तद्धिताः, वा इति चाधिक्रियन्ते। का च भूश्च अश्च तरह षां समाहारद्वन्द्वः कृभ्वस्ति, तस्य योगः, तस्मिन् कृभ्वस्तियोगे। सम्पद्यते इति विग्रहे सम्पूर्वकात् पद्धातोः अस्मिन्सूत्रे निपातनादेव भावार्थे कृत्सनज्ञके शप्रत्यये अनुबन्धलोपे शीत्वात् सार्वधातुकसंज्ञायां "दिवादिभ्यः श्यन्"[1] इति सूत्रेण श्यन्विकरणे, पररूपे च सम्पद्यशब्दः। ततः सम्पद्यस्य कर्तेति षष्ठीसमासः। संपद्यमाने वर्तमानादिति यावत्।

---

[1].पाणिनिसूत्रम् - ३.१.६६॥

केन रूपण वर्तमानाद् इति प्रश्ने वार्तककारैरुच्यते - "अभूततद्भाव इति वक्तव्यम्"[2] इति। अर्थात् कारणस्य विकाररूपेण अभूतस्य तदात्मना भावः अभूततद्भावः। तच्छब्देन विकारः परामृश्यते, स एव विकारः आत्मा=स्वभावः विकारात्मा, विकारात्मना भावः अभूततद्भावः। येन रूपेण प्रागभूतं यद्वस्तु तस्य तद्रूपप्राप्तावित्यर्थः।

अयं भावः -; कश्चन देवदत्तोऽस्तीति चिन्तयामः। देवदत्तस्य समीपे मृत्तिकायाः कश्चन घटो विद्यते। वस्तुतः घटः मृत्तिकायाः वर्णस्यैव अस्ति, परन्तु देवदत्तः तद्घटं शुक्लवर्णेन रञ्जयति, तस्य वर्णपरिवर्तनं करोति। घटः मूलरूपेण शुक्लवर्णस्य नास्ति इत्युक्ते घटस्य 'प्रकृतिः' 'शुक्लः' नास्ति, अपि च कारणवशात् शुक्लः सञ्जायते। अतः 'अशुक्लत्वं घटस्य मूलप्रकृतिः, 'शुक्लः' इति तस्य विकारः। अशुक्लः घटः शुक्लः सम्पद्यते इत्याशयः। एतादृशपरिवर्तनस्य निर्देशः यत्र क्रियते, तत्रैव वर्तमानसूत्रस्य प्रवृत्तिः। एतत् ज्ञापयितुमस्मिन् सूत्रे वार्तिककृता 'अभूततद्भाव' इति शब्दो गृहीतः। शुक्लवर्णस्य भावः (= तद्भावः) घटे अभूतः (प्रारम्भतः नास्तीति अभूततद्भावो विद्यते।

तथा चार्थः सम्पद्यते - सम्पद्यकर्तरि वर्तमानात् प्रातिपदिकातभूततद्भावे गम्यमाने कृभ्वस्तिभिर्धातुभिर्योगे च्विः प्रत्ययो भवति इति।

उदाहरणानि तु - अकृष्णः कृष्णः सम्पद्यते, तं करोति कृष्णीकरोति। अशुक्लः शुक्लः सम्पद्यते, तं करोति शुक्लीकरोति। शुक्लीभवति। शुक्लीस्यात्। घटीकरोति मृदम्। घटीभवति। घटीस्यात्। इत्यादीनि।

कृष्णीकरोति - वस्तुतोऽकृष्णः सन्वेषादिना कृष्णभावः प्राप्नोतीत्यर्थः। तं करोतीति-अकृष्णं कृष्णरूपेण संपद्यमानं करोतीत्यर्थः। अत्र वस्तुतोऽकृष्णो नटः प्रकृतिभूतः। स तावत्कृष्णभावं विकारं प्राप्नुवन्सम्पद्यमानत्वात्सम्पद्यकर्ता भवतीति तत्राऽभेदारोपमवलम्ब्य वर्तमानो विकारभूतकृष्णवाचकः शब्दः। तस्माच्च्विप्रत्ययः भवति।। तस्मिन्परे अकारस्य "अस्य च्वौ"[3] इति सूत्रेण इकारादेशे "च्वौ च"[4] इति सूत्रेण पूर्वस्येकारस्य दीर्घे कृष्णी+व् इति जाते वकारस्य "वेरपृक्तस्य"[5] इति लोपे कृष्णी इति जाते, तस्य तद्धितान्तत्वात् "कृत्तद्धितसमासाश्च"[6] इति प्रातिपदिकसञ्ज्ञायां सुपि, कृष्णीशब्दस्य "ऊर्यादिच्विडाचश्च"[7] अनेन सूत्रेण च्वि-प्रत्ययान्ततया निपातसंज्ञायां "स्वरादिनिपातमव्ययम्"[8] इत्यनेन अव्ययत्वात् "अव्ययादाप्सुपः"[9] इति सुब्लुकि कृष्णी' इति रूपं सिद्ध्यति।

---

[2].कात्यायनवार्तिकम् - ५६२५॥
[3].पाणिनिसूत्रम् - ७.४.३२॥
[4].पाणिनिसूत्रम् - ७.४.२६॥
[5].पाणिनिसूत्रम् - ६.१.६७॥
[6].पाणिनिसूत्रम् - १.२.४६॥
[7].पाणिनिसूत्रम् - १.४.६१॥
[8].पाणिनिसूत्रम् - १.१.३७॥
[9].पाणिनिसूत्रम् - २.४.८२॥

अस्मिन् सूत्रे निर्दिष्टानां धातूनां सर्वेषाम् रूपाणां विषये इदं सूत्रं प्रवर्तते। अर्थाद् कृ,भू,अस् धातूनां यस्य कस्यापि लकारस्य योगे च्विप्रत्ययो भवति। यथा - शुक्लीकुर्वन्ति, शुक्ल्यकरोत्, शुक्लीबभूव, शुक्लीस्युः। कर्मणिप्रयोगे - शुक्लीक्रियते, शुक्लीभूयते। णिजन्ताः - शुक्लीकारयति, शुक्लीभावयति इत्यादि। अभूततद्भावे इत्युक्तत्वात् शुक्लः करोति इत्यत्र च्विप्रत्ययो न भवति। यतो हि पूर्वं प्रकृतिविवक्षायामेव अभूततद्भावः सम्भवतीत्युक्तम्। अत्र तु पूर्वप्रकृतेः विवक्षा नास्तीति च्विप्रत्ययो न भवति। तथैव कृभ्वस्तियोगे इत्युक्तौ अन्यधातूनां योगे च्विप्रत्ययो न भवति। यथा - अशुक्लः शुक्लो जायते।

**न्यासकाराशयः -**

वार्तिककृता अभूततद्भाव इति वक्तव्यम्" इत्युक्तम्। तदर्थः - कारणस्य विकाररूपेण अभूतस्य तदात्मना भावः अभूततद्भावः। एतद्विषयस्य न्यासकारैः स्पष्टता कृता वर्तते। कारणम्=प्रकृतिः, तस्यैवोत्तरमवस्थान्तरम्=विकारः। तेन विकाररूपेणाभूतस्याजातस्येत्यर्थः।

ननु अभूततद्भाव' इत्यनेन कथमेतादृशार्थलाभः, शब्दतः अप्रतीतेः इति चेत् न, अभूतग्रहणाद् एतदर्थो लभ्यते। अत्र भावः=जन्म, सत्ता वा स्वीकर्तुं शक्यः। यदि सत्ता भावः स्यात्, तर्हि भ्वस्तिभ्यामेव सम्बन्धः स्यात्, करोतिना सम्बन्धः न स्यात्। ननु कृधातोः अपि सत्ता एव अर्थः स्वीकुर्मः इति चेत् तदपि न शक्यते। यतो हि यत् क्रियते सा सत्ता नैव भवति। अतः धातुत्रयोपादाने च सति यस्मिन्नर्थे गृह्यमाणे त्रिभिरपि धातुभिर्योगोऽस्ति स एवाश्रयितुं युक्तः; स च जन्मैव, न सत्ता। कृग्रहणादेष विशेषो लभ्यते इति भावः। एतेन लब्धसत्ताकस्यैव कारणस्य प्रागप्रतिपन्नविकारस्योत्तरकालविकारभूमावाप्तिरभूततद्भाव इत्युक्तं भवति। तेन यत्र प्रकृतिर्न विवक्ष्यते, तत्र प्रत्ययो न भवति, यथा-शुक्लं करोति। अत्र हि प्रकृतौ शुक्लशब्देन एवंविधः अभूततद्भावो न गम्यते। अत्र तच्छब्देन प्रकृतिविकारयोरभेदविवक्षा प्रतिपाद्यते। तेन यत्र प्रकृतिविकाररूपमापद्यमाना तस्मादभिन्ना विवक्ष्यते, तत्रैव प्रत्ययो भवति; न तु यत्र कारणतः कार्यस्य भेदो विवक्ष्यते। यत्र तु भेदः, यथा - पटं करोतीति, तत्र च्विप्रत्ययो न भवति। अर्थात् प्रकृतिः पटः तन्तूनां विकारस्तु वर्तते, तथापि प्रकृतेः पटस्य विकारो नेति न दोषः।

काशिकाकारैः सम्पद्यकर्तरि इत्यत्र सम्पद्यतेः कर्ता इति तिङन्तपूर्वपदकसमासः कृतः, तत्कथं समासत्वेऽपि तिङः केन लोपः इति प्रश्ने तत्समर्थनायोत्तरं दत्तं सौत्रत्वाद् इति। परन्तु सौत्रत्वात् अविद्यमानस्य तिङन्तसमासस्य कत्पनं, तिङ्लोपकल्पनं चेति गौरवमतः संपदनं सम्पद्यः - सम्पूर्वात् पदधातोः अस्मिन्सूत्रे निपातनात् "पाघ्राघ्माधेट्दृशः शः"[10] यत्प्रत्ययः, तदन्तस्यायं सम्पद्यश्चासौ कर्ता च सम्पद्यकर्ता इति विशेषणसमासः। तत्र तिङ्न्तस्य 'सम्पद्यतेः कर्ता' इति वृत्तिकरणं तु अर्थप्रदर्शनमात्रं कृतम्; न पुनरेतद्विग्रहवाक्यम् इति भावः।

नव्यास्तु सम्पद्यः इत्यत्र निपातनाद् भावे शप्रत्ययः इति वदन्ति। तेषां मते सम्पद्यस्य कर्ता इति षष्ठीतत्पुरुषसमासो बोध्यः। एवं च संपत्तिकर्तृबोधाकाद् विकारवाचकात् शब्दात् प्रत्ययः

---

[10].पाणिनिसूत्रम् - ३.१.१३७॥

इति भावः। परन्तु अधिककल्पनापेक्षया अस्मिन्सूत्रे निपातनात् "पाघ्राघ्माधेट्दृशः शः" इति शप्रत्ययो भवति कल्पनया कर्तरि शप्रत्यय एव उचितः।

**प्रदीपकाराः -**

अभूतपूर्वस्य विकारस्य सम्पादनम् क्रियते चेत् विकारवाचिशब्दात् 'कृ' 'भू' तथा 'अस्' एतेषाम् योगे स्वार्थे 'च्वि' इति प्रत्ययो भवति। तथा च कुम्भीकरोति, कुम्भीभवति, कुम्भीस्यादित्यादीन्युदाहरणानि। यद्यपि आधुनिकपुस्तकेषु अभूततद्भावे इति सूत्रेऽपि क्वचित् दृश्यते, परन्तु वार्तिकं दृष्ट्वा अन्यैः सूत्रे प्रक्षिप्तं तदिति बोद्धव्यम्। ननु क्रियमाणेऽपि तस्मिन्नभूततद्भावग्रहणे इह कस्मात् च्वि-प्रत्ययो न भवति- संपद्यन्तेऽस्मिन् क्षेत्रे शालय इति। अत्र हि अभूत्वा भवन्ति, किञ्चैते संपद्यकर्तारश्चातः प्रश्नः। इदन्तूदाहरणं भाष्योक्तं अन्योपलक्षणार्थम्। कृभ्वस्तियोगाभावेनैवात्र च्वेरप्रसङ्गात्। अतः 'भवन्त्यस्मिन् क्षेत्रे शालयः' इह कस्मान्न भवति च्विप्रत्ययः? तत्रोच्यते- प्रकृतिविवक्षाग्रहणञ्च। तथा च प्रकृतिर्यत्र विवक्षिता भवति, तत्रैव च्वि-प्रत्ययो भवति। अत्र तु प्रकृतेरविवक्षितत्वात् च्वेरभाव इति बोद्धव्यम्। यदा हि प्रकृतिरेव विकारात्मतामापाद्यमाना विकारभेदेन भवनक्रियानिरूपितकर्तृतया विवक्ष्यते, तदा तस्मात् च्विप्रत्ययो भवति। यथा- 'अङ्कुरीभवन्ति यवाः' इति।

येन स्वरूपेण प्रागभूतमासीत्, तेन स्वरूपेण तस्य भाव एवाभूततद्भाव इत्युच्यते, तदा अभूततद्भाव इत्यनेनैव प्रकृतिविवक्षाग्रहणमित्यर्थस्यापि क्रोडीकारात् न पृथग्वक्तव्यं तत्। समीपीभवति, अभ्याशीभवति, अन्तिकीभवतीत्यादावपि च्वि-प्रत्ययसंसाधनाय "समीपादिभ्य उपसंख्यानम्"[11] इति वार्तिकमारब्धम्। अत्र समीपादिषु प्रकृतिविकृतिभावाभावात् न प्राप्नोति स्म अतः वचनम्। यत्र हि प्रकृतिविकृतिभावस्तत्रैवास्य प्रवृत्तिः पूर्वं प्रतिपादिता। यदि तु असमपीस्थं समीपस्थं भवतीति एतदर्थः, तथा च असमीपस्थस्य तस्य समीपस्थत्वाभावात्सिद्धः सूत्रेण प्रत्यय इत्युच्यते, तदा वार्तिकं नावश्यकमिति बोद्धव्यम्।

**विमर्शः -**

अत्र च्विप्रत्ययविधायकसूत्रे प्रदीपन्यासयोरुभयत्रापि भूयांसो एतत्सूत्रानुसारिणो विचाराः प्रतिपादिताः वर्तन्ते। न्यासग्रन्थे हि काशिकानुसारेण सूत्रं व्याख्यायन् सूत्रोक्त 'अभूततद्भाव'ग्रहणविषये गूढतया विषयाः समुपस्थापिताः। तदनु कृभ्वस्तिग्रहणेन दोषमाशङ्क्य तद्दोषवारणम्, तथा तेन लभ्यः अर्थविशेषश्च तत्र प्रतिपादितः। कैयटग्रन्थे तावत् अभूततद्भावग्रहणप्रयोजनम्, प्रकृतिविवक्षाग्रहणप्रयोजनम्, तदन्यथासिद्धत्वम्, समीपादिभ्य उपसंख्यानमिति वार्तिकस्यावश्यकता, तस्य प्रत्याख्यानमित्येवं विचाराः विचारिताः।

अत्र सूत्रे न्यासप्रदीपयोः प्रायेण भिन्न-भिन्ना एव विषयाः प्रविचारिता इति न तथा वैमत्यं परिलक्ष्यते। यद्यपि सामान्यतः न्यासग्रन्थस्य प्रदीपस्य च पर्यालोचने केषुचन विषयेषु विमतता

[11].कात्यायनवार्तिकम - ५६२७॥

परिलक्ष्येत, परन्तु वस्तुत: पर्यालोच्यमाने तात्पर्यार्थ: समान एव परिगृह्यते। शैल्यादिभेदेन तथा भानमिति त्वन्यदेतत्।

इदन्त्वत्रावधेयम्- यत्र प्रकृतिस्वरूपमेव विकाररूपमापद्यमानं विकाराऽभेदेन विवक्ष्यते, तत्रैवायं प्रत्ययो भवतीति सर्वसम्मतो निर्णय इति।

**सन्दर्भग्रन्थसूची -**


1. काशिका न्यासपदमञ्जरीसहिता (पञ्चमषष्ठभागौ) वामनजयादित्यौ/जयशङ्करलाल त्रिपाठी तारा प्रिन्टिन्ग हाउस १६८५।
2. प्रदीपोद्योतसहितमहाभाष्यम्(चतुर्थो खण्डः) पतञ्जलिः/भार्गवशास्त्री चौखम्बासंस्कृत प्रतिष्ठानम् १६८८।
3. अमरकोशः सुधाव्याख्यासहितः अमरसिंहः/प.शिवदत्त दाधिमथः चौखम्बासंस्कृत प्रतिष्ठान २०१३।
4. वाक्यपदीयम्(प्रथमो भागः) भर्तृहरिः/विद्यावाचस्पति. हरिनारायणतिवारी चौखम्बासंस्कृत सीरिज २०१५।
5. अष्टाध्यायी पाणिनिः/गोपालदत्तपाण्डेयः चौखम्बासुरभारतीप्रकाशन २०१८।
6. न्यायसिद्धान्तमुक्तावली विश्वनाथपञ्चाननः/हरिरामशुक्लः चौखम्बा प्रकाशन वि.२०७२।
7. व्याकरणमहाभाष्यम् (प्रथमो भागः) पतञ्जलिः/भार्गवशास्त्री चौखम्बासंस्कृत प्रतिष्ठान २०१४।
8. परिभाषेन्दुशेखरः नागेशभट्टः/गोविन्दनरहरिः वैजापुरकरः चौखम्बासंस्कृत प्रतिष्ठान वि.सं. २०३६।
9. लघुमञ्जूषा नागेशभट्टः/माधवशस्त्री भण्डारी,नरहरहरिशास्त्रिप्रभृतयः चौखम्बासंस्कृत सीरिज वि.सं. २०४६।
10. वैयाकरणभूषणसारः (तत्त्वदर्शिनीसहितः) कौण्डभट्टः/ डा.कोम्पेल्ल. सत्यनारायणशास्त्री श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः २०१६।
11. लघुशब्देन्दुशेखरः नागेशभट्टः/प्रो बालशास्त्री चौखम्बा सुरभारती प्रकाशन २०१३।



* शोधार्थी, केन्द्रीयसंस्कृतविश्वविद्यालयः, गोमती नगरम्, लखनऊ परिसरः, लखनऊ (उ.प्र.)

** आचार्यः, केन्द्रीयसंस्कृतविश्वविद्यालयः, गोमती नगरम्, लखनऊ परिसरः, लखनऊ (उ.प्र.)